DOI-10.53571/NJESR.2019.1.1.48-51

# पुराणेषु श्रीजगन्नाथस्य चतुर्धाविग्रहः

डॉ.आदित्यनारायणदाशः

परियोजनाध्येता

राष्ट्रियसंस्कृतसंस्थानम्

Ssipl.aditya@gmail.com

(Received:1January2019/Revised:15January2019/Accepted:25January2019/Published:30January2019)

भगवतः नारायणस्य चतुर्व्युहरूपेण उपासना शास्त्रप्रसिद्धा वर्तते। रामावतारे राम-लक्ष्मण-भरत-शत्रुघ्नरूपेण यथैव भगवतः चत्वारः विग्रहाः तथैव कृष्णावतारेऽपि वासुदेव-सङ्कर्षण-प्रद्युम्न-अनिरुद्धरूपेण चत्वारि स्वरुपाणि विराजन्ते। अतः श्रीमद्भागवते -

“नमो भगवते तुभ्यं वासुदेवाय धीमहि प्रद्युम्नायानिरुद्धाय नमः सङ्कर्षणाय च।[1]” इति मन्त्रेण चतुर्व्यूहोपासना श्रुयते। एवमेव पुरुषोत्तमक्षेत्रेऽपि भगवान् चतुर्द्धाविग्रहं प्रकाश्य विराजते। परन्तु क्षेत्रेऽस्मिन् चतुर्द्धाविग्रहस्य स्वरूपं भिन्नमेव वर्तते। रामकृष्णौ इति द्वौ भ्रातरौ, लक्ष्मीरूपा भगवती सुभद्रा, चक्रं सुदर्शनं चेत्येव चतसृणां मूर्त्तीनां स्वरूपं प्रकाशितं वर्तते। तथा हि पुरुषोत्तममाहात्म्ये शवरराजस्य विश्वावसोः इन्द्रद्युम्नं प्रति वचनम्। यथा -

“तदादेशाद्दरुमयं प्रभोर्लिङ्गचतुष्टयम्। पूजयिष्यति भक्त्या च प्रतिष्ठाप्य स्वयम्भूवा।।[2]”

तत्रैव देवर्षेः नारदस्य वचनं महाराजमिन्द्रद्युम्नं प्रति वर्तते। यथा -

“चतस्रो मूर्तयस्तस्य त्वय्यनुग्रहविद्धयः।

चराचराणां स्रष्टा यः साक्षाल्लोकपितामहः।

मामुवाच व्रजाशुत्वमिन्द्रद्युम्नस्य चान्तिकम्।।[3]”

चतुर्मूर्त्तीनामाविर्भावविषये स्कन्दपुराणे पुरुषोत्तममाहात्म्ये अष्टादशे ऊनविंशे चाध्याये सविस्तं वर्णितमस्ति। राजा इन्द्रद्युम्नः देवर्षिनारदस्य यथा निर्देशः तथा भगवतः दर्शनाय तत्परः अभवत्। अश्वमेधयज्ञस्य परिपूर्त्यनन्तरं विल्वेश्वरशिवक्षेत्रे यदा सः अवभृथस्नानाय समुद्यतः अभवत् तदा वटरूपिमहावृक्षस्य समुद्रोपरि प्राकट्यमशृणोत्। तदा नियुक्ताः सेवकाः कृताञ्जलिपुटाः सन्तः महावृक्षविषये राजानमसूचयन्। यथा -

“ततः प्रववृते सुत्या नृपतेर्वाजिमेधिका। तस्यां तैलोक्यमभवदेकसद्मनिभं द्विजाः।।

सास्त्रैः स्तोत्रैर्दिवस्पृग्भिर्वक्रमसमुज्ज्वलैः। यथा पदस्वरन्यासैरन्ये शब्दस्तिरोहिताः।।

दीनेभ्योऽवारितं तत्र दीयन्ते वाञ्छितानि वै। नटनर्त्तकसूतानां साऽभूत् कल्पद्रुमोपमा।।

तन्मध्येऽवभृथे स्नातुं कृता यत्रोपकारिका। दक्षिणे तटभूदेशे विल्वेश्वरसमीपतः।।

नियुक्ताः सेवका राज्ञा ससम्भ्रममुपस्थिताः। न्यवेदयन् नृपतिं कृताञ्जलिपुटा द्विजाः।।

देव दृष्टो महावृक्षस्तटभूमौ महोदधेः। प्रविष्टाग्रः समुद्रान्त कल्लोलप्लवमूलकः।।[4]"

सः दिव्यमहावृक्षः रक्तवर्णः शङ्खचक्राङ्कितः अलौकिकाद्भूतश्चासीत्। अदृष्टपूर्ववृक्षः स्वदिव्यसुगन्धबलेन तटदेशं सुगन्धयति स्म। तमलौकिकं दृष्ट्वा तत्रस्थाः सेवकाः चकिताः सन्तः दद्विषये नारदाय प्रपच्छ। यथा-

"मञ्जिष्ठवर्णः सर्वत्र शङ्खचक्राङ्कितः प्लवन् । स्नानवेश्मसमीपेऽसौ दृष्टोऽस्माभिः परोऽद्भुतः।।

न दृष्टपूर्वो वृक्षोऽयमुद्यत्सूर्यानिभोंऽशुना । गन्धेन वासयन् सर्वां तटभूमिं सुन्धिना।।

द्रुमः साधारणो नाऽयं लक्ष्यते देवभूरुडः। कश्चिद्देवस्तरूव्याजादागतो लक्ष्यते धृवम्।।[5]"

ततः नारदः यज्ञसफलार्थं पुर्णाहुतिप्रदानाय रज्ञेऽसूचयत्। ततः सेवकानां जिज्ञासां परिज्ञाय नारदः परमब्रह्मणः दारवतनुविषये तमकथयत्। स्वप्नावस्थायां पूर्वदृष्टस्य विष्णोः अङ्गात् स्खलितः स्थाणुरूपपरमेश्वरः अयं वृक्षः इति यथा -

"नारदः प्रहसन् वाक्यमुवाच नृपसत्तमम् । पूर्णाहुतिः समाप्नोतु यथा स्यात् सफलः क्रतुः।।

उपस्थितं ते तद् भाग्यं स्वप्न यद्दृष्टवान् पुरा । श्वेतद्वीपे विश्वमूर्त्तिर्दृष्टो यो विष्णुरव्ययः।।

तदङ्गस्खलितं रोम तरुत्वमुपपद्यते । अंशावतारः स्थास्नुर्यः पृथिव्यां परमेष्ठिनः।।[6]"

राजा इन्द्रद्युम्नः महावृक्षस्य माहात्म्यं श्रुत्वा हर्षान्वितः राजा द्रुमरूपपरमेश्वरस्य समीपं गतवान्। तत्र साक्षात् दारूब्रह्मणः दर्शनपुरुस्सरं जीवन्मुक्तः सन् स्वजन्मसार्थकत्वमन्वभवत्। य़था -

"विचार्येत्थं मुदायुक्तौ तावुभौ नृपनारदौ । सुसमृद्धौ ततो यातो यत्रासौ भगवद्द्रुमः।।

तं दृष्ट्वा हर्षिताः सर्वे ब्रह्मसाक्षादुपस्थितम् । मेनिरे जन्मसाफल्यं जीवन्मुक्ता महोदयाः।।[7]"

राजा इन्द्रद्युम्नः स्वस्वप्ने यथा चतुर्भूजजगन्नाथस्य दर्शनमकरोत् तथैव चतुर्शाखाविशिष्टे वृक्षेऽस्मिन् भगवतः दर्शनं कृत्वा माधवविरहजन्यकष्टात् विमुक्तः अभवत्। यथा -

"इन्द्रद्युम्नोऽपि नृपतिर्ममज्जानन्दसागरे । स्वप्ने दृष्ट्वा जगन्नाथं यथासौ भगवत्प्रियः।।

तथा ददर्श तं वृक्षं चतुः शाखं चतुर्भुजम् । स्वकं श्रमं मन्यमानः सफलं नृपसत्तमः।।

जहौ शोकं नीलमणिमाधवान्तर्धिजं द्विजाः । पुनः पुनः प्रणम्यैनं हर्षाश्रुनयनो नृपः।।[8]"

ततः इन्द्रद्युम्नः केन दारुविग्रहाणां निर्माणं भविष्यतीति विषये चिन्तयन् सः अशरीरां वाणीं (आकाशवाणीं) श्रुतवान्। यथा -

"विचारयन्तो तावित्थं यावन्नारदपार्थिवौ । अशरीरां ततो वाणीं शुस्रुवे चान्तरिक्षतः।।

तत्र विष्मयमानानां सर्वेषामेव शृण्वताम् । अपौरुषेयो भगवानविचारपथे स्थितः ।।[9]"

परमेश्वरः स्वयं बृद्धवर्द्धकीरूपेण महावेद्यामवतीर्य पञ्चदशदिनं यावत् यत्नपूर्वकं द्वारं पिधाय विग्रहाणां निर्माणं करिष्यति। यावत् दारुविग्रहनिर्माणस्य समाप्तिः नैव भविष्यति तावत् द्वारस्योद्घाटनं कृत्वा

अर्धनिर्मातविग्रहाणां दर्शनं निषिद्धं भवेत्। विग्रहनिर्माणानां शब्दः यथा वहिर्नागच्छेत्, तदर्थं गृहस्य वहिर्देशे नृत्यवाद्यादिभिः उत्सवं कारयेत्। यथा -

"सुगुप्तायां महावेद्यां स्वयं सोऽवतरिष्यति । प्रच्छाद्यतां दनान्येव यावत् पञ्चदशानि वै।।

उपस्थितोऽयं यो बृद्धः शस्त्रपाणिस्तु वर्द्धकिः । एनमन्तः प्रवेश्यैव द्वारं वन्धन्तु यत्नतः।।

वहिर्वाद्यानि कुर्वन्तु यावत्तु घटना भवेत् । श्रुतो हि घटनाशब्दो वाधिर्योन्धत्वदायकः।।

नरके वसतिं चैव कुर्यात् सन्ताननाशनम् । नान्तः प्रवेशं कुर्यान् न पश्येच्च कदाचन।।[10]"

यथाकाशवाणीमनुश्रुत्य राजा आवद्धगृहात् वहिर्तिष्ठन् कतिदिनेभ्यो अनन्तरं दिव्यगन्धादिमन्वभूत्। ततः देवाः स्वर्गादागत्य पूर्वं यथा माधवमुपासितवन्तः तथैव ईदानीमपि वृक्षराजं विष्णुरूपेण समर्च्चयन्। देवानामर्च्चनेन भगवतः दारुशरीरे दिव्यचिह्नानि अजायन्त। क्रमशः पञ्चदशदिवसानन्तरं भगवतः चतुर्धाविग्रहाः स्वयं भगवता निर्मीय प्रकटिताः। राजा पूर्वं श्रीविग्रहाणां प्रकटनविषये यथाश्रुणोत् तथैव जनार्द्दन-बलराम-सुभद्रा-सुदर्शनैः दिव्यसिंहासंने प्रकटितः। तत्र जनार्द्दनस्य हस्ते शङ्खचक्रगदापद्मचिह्नानि, बलरामस्य हस्ते गदामुषलचक्रवज्रचिह्नानि, सुभद्रायाः हस्ते पद्म-अभयमुद्राचिह्नौ च विराजन्ते। जनाद्रनः साक्षात् महाविष्णुः कृष्णवर्णकः, बलभद्रस्तु अनन्तदेवः छत्राकृतिसप्तफणामुकुटोज्वलकुण्डलः, चारुवदना सूभद्रा साक्षात् लक्ष्मीरूपिणी च वर्तते। य़था -

"यथा हि माधवं पूर्वं तथा तं विष्णुशाखिनम्। उपासनास्तुदेवानां दिव्यचिह्नानि जज्ञिरे।।

निर्वाह स्वयं देवः क्रमात् पञ्चदशे दिने। चतुर्मूर्त्तिः स भगवान् यथापूर्वं मयोदितः।।

तादृगाविर्वभूवासो युष्काकं वर्ण्णतः पुरा। दिव्यसिहासनगतो भद्रावलसूदर्शनैः।।

शङ्खचक्रगदापद्मलसद्वाहुर्जनार्जनः। गदामुसलचक्राव्जं धारयन् पन्नगाकृति।।

छत्राकृतिफणासप्तमुकुटोज्ज्वलकुण्डलः। सुभद्रा चारुवदना वराव्जाभयधारिणी।।

लक्ष्मीः पादुर्वभूवेयं सर्वचैतन्यरूपिणी। इयं कृष्णावतारे हि रोहिणीगर्भसम्भवा।।

वलभद्राकृतिर्जाता वलरूपस्य चिन्तनात्। क्षणं न सहते सा हि मोक्तुं लीलावतारिणम्।।[11]"

वस्तुतो जगन्नाथबलभद्रसुभद्रासु यद्यपि लोकव्यवहारे भेदः परिदृश्यते तथापि तात्त्विकदृष्ष्या न कश्चित् भेदः अस्ति। पुरुषत्वेन जगन्नातवलभद्रयोर्मध्ये न कश्चित् भेदः। तथैव पुरुषत्वेन भगवान्विष्णुः स्त्रीत्वेन श्रीलक्ष्मीदेवी विद्यते। सकलविद्यमानत्वात् लक्ष्मीविष्णोः मध्ये भेदोऽपि न विद्यते। यथा -

"न भेदोऽस्तीह को विप्राः कृष्णस्य च बलस्य च। एकगर्भप्रसूतत्वाद् व्यवहारोऽथ लौकिकः।।

भगिनी वलदेवस्येत्यषा पौराणिकी कथा। पुंरूपे स्त्रीस्वरूपेण लक्ष्मीः सर्वत्र तिष्ठति।।

पुंनाम्ना भगवान् विष्णुः स्रीनाम्ना कमलालया। देवतिर्यन्मनुष्यादौ विद्यते न तयोः परम्।।[12]"

वामदेवसंहितायामपि राजा इन्द्रद्युम्नः पञ्जदशदिवसानन्तरं द्वारमुत्पाट्य चतुर्मूर्त्तिधरं देवमपश्यदिति प्रतिपादितम्। यथा -

"पञ्चदशदिने द्वारमुत्पाट्य तत्र पश्यति। चतुर्मूर्त्तिधरं देवं ब्रह्ममूर्त्तिं निरामयम्।।[13]"

**पादटिप्पणी -**

1. श्रीमद्भागवतमहापुराण
2. पुरुषोत्तममाहात्म्यम् - 8 /76
3. पुरुषोत्तममाहात्म्यम् - 8 /37
4. पुरुषोत्तममाहात्म्यम् - 14/1-6
5. पुरुषोत्तममाहात्म्यम् - 18 /7-9
6. पुरुषोत्तममाहात्म्यम् - 18 /11-13
7. पुरुषोत्तममाहात्म्यम् - 18 /18-19
8. पुरुषोत्तममाहात्म्यम् - 18 /20-22
9. पुरुषोत्तममाहात्म्यम् - 18 /35-36
10. पुरुषोत्तममाहात्म्यम् - 18 /37-40
11. पुरुषोत्तममाहात्म्यम् - 19/6-12
12. पुरुषोत्तममाहात्म्यम् - 19 /13-15
13. वामदेवसंहिता 5 /32